# श्री बटुकभैरव सहस्त्रनाम स्तोत्रम्

## विनियोगः

ॐ अस्य श्रीबटुकभैरवसहस्त्रनामात्मक स्तोत्रस्य श्रीदुर्वासा ऋषिः ।
अनुष्टुप्छन्दः । श्रीबटुकभैरवो देवता ।
मम सर्वकार्यसिद्ध्यर्थ सर्वशत्रुनिवारणार्थ
श्रीबटुकभैरवसहस्त्रनामस्तवपाठे विनियोगः ।

## ऋष्यादिन्यासः

श्रीदुर्वासा ऋषये नमः शिरसि । अनुष्टुप् छन्दसे नमः मुखे । श्रीबटुकभैरवो देवतायै नमः हृदि ।
मम सर्वकार्यसिद्ध्यर्थ सर्वशत्रुनिवारणार्थं श्रीबटुकभैरवसहस्त्रनामस्तवपाठे विनियोगाय नमः सर्वाङ्गे ।

ॐ नमो भैरवरूपाय भैरवाय नमो नमः । नमो भद्रस्वरूपाय जयदाय नमो नमः ॥
नमः कल्पस्वरूपाय विकल्पाय नमो नमः । नमः शुद्धस्वरूपाय सुप्रकाशाय ते नमः ॥
नमः कङ्कालरूपाय कालरूप नमोऽस्तुते । नमस्त्यम्बकरूपाय महाकालाय ते नमो नमः ॥
नमः संसारसाराय सारदाय नमो नमः । नमो भैरवरूपाय भैरवाय नमो नमः ॥
नमः क्षेत्रनिवासाय क्षेत्रपालाय ते नमः । क्षेत्राक्षेत्रस्वरूपाय क्षेत्रकर्त्रे नमो नमः ॥
नमो नागविनाशाय भैरवाय नमः । नमो मातङ्गरूपाय भाररूप नमोऽस्तु ते ॥
नमः सिद्धस्वरूपाय सिद्धिदाय नमो नमः । नमः बिन्दुस्वरूपाय बिन्दुसिन्धुप्रकाशिने ॥
नमः मङ्गलरूपाय मङ्गलाय नमो नमः । नमः सङ्कटनाशाय शङ्कराय नमो नमः ॥
नमो धर्मस्वरूपाय धर्मदाय नमो नमः । नमोऽनन्तस्वरूपाय एकरूप नमोऽस्तु ते ॥
नमो वृद्धिस्वरूपाय वृद्धिकामिन्नमोऽस्तुते । नमो मोहनरूपाय मोक्षरूपाय ते नमः ॥ १० ॥

नमो जलदरूपाय सामरूप नमोऽस्तु ते। नमः स्थूलस्वरूपाय शुद्धरूपाय ते नमः ॥
नमो नीलस्वरूपाय रङ्गरूपाय ते नमः। नमो मण्डलरूपाय मण्डलाय नमो नमः ॥
नमो रुद्रस्वरूपाय रुद्रनाथाय ते नमः। नमो ब्रह्मस्वरूपाय ब्रह्मवक्त्रे नमो नमः ॥
नमस्त्रिशूलधाराय धाराधारिन्नमोऽस्तुते। नमः संसारबीजाय विरूपाय नमो नमः ॥
नमो विमलरूपाय भैरवाय नमो नमः। नमो जङ्गमरूपाय जलजाय नमो नमः ॥
नमः कालस्वरूपाय कालरुद्राय ते नमः। नमो भैरवरूपाय भैरवाय नमो नमः ॥
नमः शत्रुविनाशाय भीषणाय नमो नमः। नमः शान्ताय दान्ताय भ्रमरूपिन्नमोऽस्तु ते ॥
नमो न्यायगम्याय योगिध्येयाय ते नमः। नमः कमलकान्ताय कालवृद्धाय ते नमः ॥
नमो ज्योतिःस्वरूपाय सुप्रकाशाय ते नमः। नमः कल्पस्वरूपाय भैरवाय नमो नमः ॥
नमो जयस्वरूपाय जगज्जाड्यनिवारणे। महाभूताय भूताय भूतानां पतये नमः ॥
नमो नन्दाय वृन्दाय वादिने ब्रह्मवादिने। नमो वादस्वरूपाय न्यायगम्याय ते नमः ॥
नमो भवस्वरूपाय मायानिर्माणरूपिणे। विश्ववन्द्याय वन्द्याय नमो विश्वम्भराय ते ॥
नमो नेत्रस्वरूपाय नेत्ररूपिन्नमोऽस्तु ते। नमो वरुणरूपाय भैरवाय नमो नमः ॥
नमो यमस्वरूपाय वृद्धरूपाय ते नमः। नमः कुबेररूपाय कालनाथाय ते नमः ॥
नमः ईशानरूपाय अग्निरूपाय ते नमः। नमः वायुस्वरूपाय विश्वरूपाय ते नमः ॥
नमः प्राणस्वरूपाय प्राणाधिपतये नमः। नमः संहाररूपाय पालकाय नमो नमः ॥
नमश्चन्द्रस्वरूपाय चण्डरूपाय ते नमः । नमो मन्दरवासाय वासिने सर्वयोगिनाम् ॥
योगिगम्याय योग्याय योगिनां पतये नमः । नमो जङ्गमवासाय वामदेवाय ते नमः ॥
नमः शत्रुविनाशाय नीलकण्ठाय ते नमः । नमो भक्तिविनोदाय दुर्भगाय नमो नमः ॥
नमो मान्यस्वरूपाय मानदाय नमो नमः । नमो भूतिविभूषाय भूषिताय नमो नमः ॥
नमो रजःस्वरूपाय सात्त्विकाय नमो नमः। नमस्तामसरूपाय तारणाय नमो नमः ॥
नमो गङ्गाविनोदाय जयसन्धारिणे नमः। नमो भैरवरूपाय भयदाय नमो नमः ॥
नमः सङ्ग्रामरूपाय सङ्ग्रामजयदायिने। सङ्ग्रामसाररूपाय पावनाय नमो नमः ॥ ३३ ॥

नमो वृद्धिस्वरूपाय वृद्धिदाय नमो नमः। नमस्त्रिशूलहस्ताय शूलसंहारिणे नमः ॥
नमो द्वन्द्वस्वरूपाय रूपदाय नमो नमः। नमः शत्रुविनाशाय शत्रुबुद्धिविनाशने ॥
महाकालाय कालाय कालनाथाय ते नमः। नमो भैरवरूपाय भैरवाय नमो नमः ॥
नमः शम्भुस्वरूपाय शम्भुरूपिन्नमोऽस्तुते। नमः कमलहस्ताय डमरूहस्ताय ते नमः ॥
नमः कुक्कुरवाहाय वहनाय नमो नमः। नमो विमलनेत्राय त्रिनेत्राय नमो नमः ॥
नमः संसाररूपाय सारमेयाय वाहिने। संसारज्ञानरूपाय ज्ञाननाथाय ते नमः ॥
नमो मङ्गलरूपाय मङ्गलाय नमो नमः। नमो न्यायविशालाय मन्त्ररूपाय ते नमः ॥
नमो यन्त्रस्वरूपाय यन्त्रधारिन्नमोऽस्तु ते। नमो भैरवरूपाय भैरवाय नमो नमः ॥
नमः कङ्कालरूपाय कलङ्काय नमो नमः। नमः संसारपाराय भैरवाय नमो नमः ॥
रुण्डमालाविभूषाय भीषणाय नमो नमः। नमो दुखःनिवाराय विहाराय नमो नमः ॥
नमो दण्डस्वरूपाय क्षणरूपाय नमो नमः। नमो मुहूर्तरूपाय सर्वरूपाय ते नमः ॥
नमो मोदस्वरूपाय श्रोतरूपाय नमो नमः। श्रोणरूपाय नमो नक्षत्ररूपाय क्षेत्ररूपाय ते नमः ॥
नमो विष्णुस्वरूपाय बिन्दुरूपाय ते नमः। नमो ब्रह्मस्वरूपाय ब्रह्मचारिन्नमोऽस्तु ते ॥
नमः कन्थानिवासाय पटवासाय ते नमः। नमः ज्वालनरूपाय ज्वलनाय नमो नमः ॥
नमो बटुकरूपाय धूर्तरूपाय ते नमः। नमो भैरवरूपाय भैरवाय नमो नमः ॥
नमो वैद्यस्वरूपाय वैद्यरूपिन्नमोऽस्तु ते। नमः औषधरूपाय औषधाय नमो नमः ॥
नमो व्याधिनिवाराय व्याधिरूपिन्नमो नमः। नमो ज्वरनिवाराय ज्वररूपाय ते नमः ॥
नमो रुद्रस्वरूपाय रुद्राणां पतये नमः। विरूपाक्षाय देवाय भैरवाय नमो नमः ॥
नमो ग्रहस्वरूपाय ग्रहाणां पतये नमः। नमः पवित्रधाराय परशुधाराय ते नमः ॥
यज्ञोपवीत देवाय देवदेव नमोऽस्तु ते। नमो यज्ञस्वरूपाय यज्ञानां फलदायिने ॥
नमो रुद्रप्रतापाय तापनाय नमो नमः। नमो गणेशरूपाय गणरूपाय ते नमः ॥
नमो रश्मिस्वरूपाय रश्मिरूपाय ते नमः। नमो मलयरूपाय रश्मिरूपाय ते नमः ॥
नमो विभक्तिरूपाय विमलाय नमो नमः। नमो मधुररूपाय मधुपूर्णकलापिने ॥ ५६ ॥

कालेश्वराय कालाय कालनाथाय ते नमः । नमो विश्वप्रकाशाय भैरवाय नमो नमः ॥
नमो योनिस्वरूपाय मातृरूपाय ते नमः । नमो भगिनीरूपाय भैरवाय नमो नमः ॥
नमो वृषस्वरूपाय कर्मरूपाय ते नमः । नमो वेदान्तवेद्याय वेदसिद्धान्तसारिणे ॥
नमः शाखाप्रकाशाय पुरुषाय नमो नमः । नमः प्रकृतिरूपाय भैरवाय नमो नमः ॥
नमो विश्वस्वरूपाय शिवरूपाय ते नमः । नमो ज्योतिःस्वरूपाय निर्गुणाय नमो नमः ॥
निरञ्जनाय शान्ताय निर्विकाराय ते नमः । निर्मयाय विमोहाय विश्वनाथाय ते नमः ॥
नमः कण्ठप्रकाशाय शत्रुनाशाय ते नमः । नमः आशाप्रकाशाय आशापूरकृते नमः ॥
नमो मत्स्यस्वरूपाय योगरूपाय ते नमः । नमो वाराहरूपाय वामनाय नमो नमः ॥
नमः आनन्दरूपाय आनन्दाय नमो नमः । नमोऽस्त्वनर्घकेशाय ज्वलत्केशाय ते नमः ॥
नमः पापविमोक्षाय मोक्षदाय नमो नमः । नमः कैलासनाथाय कालनाथाय ते नमः ॥
नमो बिन्दुदबिन्दाय बिन्दुभाय नमो नमः । नमः प्रणवरूपाय भैरवाय नमो नमः ॥
नमो मेरुनिवासाय भक्तवासाय ते नमः । नमो मेरुस्वरूपाय भैरवाय नमो नमः ॥
नमो भद्रस्वरूपाय भद्ररूपाय ते नमः । नमो योगिस्वरूपाय योगिनां पतये ते नमः ॥
नमो मैत्रस्वरूपाय मित्ररूपाय ते नमः । नमो ब्रह्मनिवासाय काशीनाथाय ते नमः ॥
नमो ब्रह्माण्डवासाय ब्रह्मवासाय ते नमः । नमो मातङ्गवासाय सूक्ष्मवासाय ते नमः ॥
नमो मातृनिवासाय भ्रातृवासाय ते नमः । नमो जगन्निवासाय जलावासाय ते नमः ॥
नमः कौलनिवासाय नेत्रवासाय ते नमः । नमो भैरववासाय भैरवाय नमो नमः ॥
नमः समुद्रवासाय वह्निवासाय ते नमः । नमश्चन्द्रनिवासाय चन्द्रावासाय ते नमः ॥
नमः कलिङ्गवासाय कलिङ्गाय नमो नमः । नमः उत्कलवासाय शक्रवासाय ते नमः ॥
नमः कर्पूरवासाय सिद्धिवासाय नमः । नमः सुन्दरवासाय भैरवाय नमो नमः ॥
नमः आकाशवासाय वासिने सर्वयोगिनाम् । नमो ब्राह्मणवासाय शूद्रवासाय ते नमः ॥
नमः क्षत्रियवासाय वैश्यवासाय ते नमः । नमः पक्षिनिवासाय भैरवाय नमो नमः ॥
नमः पातालमूलाय मूलावासाय ते नमः । नमो रसातलस्थाय सर्वपातालवासिने ॥ ७९ ॥

नमः कङ्कालवासाय कङ्कवासाय ते नमः । नमः मन्त्रनिवासाय भैरवाय नमो नमः ॥
नमोऽहङ्काररूपाय रजोरूपाय ते नमः । नमः सत्त्वनिवासाय भैरवाय नमो नमः ॥
नमो नलिनरूपाय नलिनाङ्गप्रकाशिने । नमः सूर्यस्वरूपाय भैरवाय नमो नमः ॥
नमो दुष्टनिवासाय साधूपायस्वरूपिणे । नमो नम्रस्वरूपाय स्तम्भनाय नमो नमः ॥
पञ्चयोनिप्रकाशाय चतुर्योनिप्रकाशिने । नवयोनिप्रकाशाय भैरवाय नमो नमः ॥
नमः षोडशरूपाय नमः षोडशधारिणे । चतुःषष्टिप्रकाशाय भैरवाय नमो नमः ॥
नमो बिन्दुप्रकाशाय सुप्रकाशाय ते नमः । नमो गणस्वरूपाय सुखरूप नमोऽस्तुते ॥
नमश्चाम्बररूपाय भैरवाय नमो नमः । नमो नानास्वरूपाय सुखरूप नमोऽस्तुते ॥
नमो दुर्गस्वरूपाय दुःखहर्त्रे नमोऽस्तुते । नमो विशुद्धदेहाय दिव्यदेहाय ते नमः ॥
नमो भैरवरूपाय भैरवाय नमो नमः । नमः प्रेतनिवासाय पिशाचाय नमो नमः ॥
नमो निशाप्रकाशाय निशारूप नमोऽस्तु ते । नमः सोमार्धरामाय धराधीशाय ते नमः ॥
नमः संसारभाराय भारकाय नमो नमः । नमो देहस्वरूपाय अदेहाय नमो नमः ॥
देवदेहाय देवाय भैरवाय नमो नमः । विश्वेश्वराय विश्वाय विश्वधारिन्नमोऽस्तु ते ॥
स्वप्रकाशप्रकाशाय भैरवाय नमो नमः । स्थितिरूपाय नित्याय स्थितीनां पतये नमः ॥
सुस्थिराय सुकेशाय केशवाय नमो नमः । स्थविष्ठाय गरिष्ठाय प्रेष्ठाय परमात्मने ॥
नमो भैरवरूपाय भैरवाय नमो नमः । नमः पारदरूपाय पवित्राय नमो नमः ॥
नमो वेधकरूपाय अनिन्दाय नमो नमः । नमः शब्दस्वरूपाय शब्दातीताय ते नमः ॥
नमो भैरवरूपाय भैरवाय नमो नमः । नमोऽनिन्द्यस्वरूपाय ह्यनिन्दाय नमः ॥
नमो विष्णुरूपाय भैरवाय नमो नमः । नमः शरणरूपाय शरण्यानां नमो ॥
नमः शरण्यरक्षाय भैरवाय सुखाय ते । नमः स्वाहास्वरूपाय स्वधारूपाय ते नमः ॥
नमो वौषट्स्वरूपाय भैरवाय नमो नमः । अक्षराय नमस्तुभ्यं त्रिधामात्रास्वरूपिणे ॥
नमोऽक्षराय शुद्धाय भैरवाय नमो नमः । अर्धमात्राय पूर्णाय सम्पूर्णाय नमो नमः ॥
नमो भैरवरूपाय भैरवाय नमो नमः । नमोऽष्टचक्ररूपाय ब्रह्मरूपाय ते नमः ॥ १०२ ॥

नमो भैरवरूपाय भैरवाय नमो नमः । नमः सृष्टिस्वरूपाय सृष्टिकर्त्रे महात्मने ॥
नमः पाल्यस्वरूपाय भैरवाय नमो नमः । सनातनाय नित्याय निर्गुणाय गुणाय ते ॥
नमः सिद्धाय शान्ताय भैरवाय नमो नमः । नमो धारास्वरूपाय खड्गहस्ताय ते नमः ॥
नमस्त्रिशूलहस्ताय भैरवाय नमो नमः । नमः कुण्डलवर्णाय शवमुण्डविभूषिणे ॥
महाक्रुद्धाय चण्डाय भैरवाय नमो नमः । नमो वासुकिभूषाय सर्पभूषाय ते नमः ॥
नमः कपालहस्ताय भैरवाय नमो नमः । पानपात्रमत्ताय मत्तरूपाय ते नमः ॥
नमो भैरवरूपाय भैरवाय नमो नमः । नमो माधवरूपाय माधवाय नमो नमः ॥
नमो माङ्गल्यरूपाय भैरवाय नमो नमः । नमः कुमाररूपाय स्त्रीरूपाय नमो नमः ॥
नमो गन्धस्वरूपाय भैरवाय नमो नमः । नमो दुर्गन्धिरूपाय सुगन्धाय नमो नमः ॥
नमः पुष्पस्वरूपाय पुष्पभूषण ते नमः । नमः पुष्पप्रकाशाय भैरवाय नमो नमः ॥
नमः पुष्पविनोदाय पुष्पपूजाय ते नमः । नमो भक्तिनिवासाय भक्तदुःखनिवारिणे ॥
भक्तप्रियाय शान्ताय भैरवाय नमो नमः । नमो भक्तिस्वरूपाय रूपदाय नमो नमः ॥
नमो भैरवरूपाय भैरवाय नमो नमः । नमो वासाय भद्राय वीरभद्राय ते नमः ॥
नमः सङ्ग्रामसाराय भैरवाय नमो नमः । नमः खट्वाङ्गहस्ताय कालहस्ताय ते नमः ॥
नमोऽघोराय घोराय घोराघोरस्वरूपिणे । घोरधर्माय घोराय भैरवाय नमो नमः ॥
घोरत्रिशूलहस्ताय घोरपानाय ते नमः । घोररूपाय नीलाय भैरवाय नमो नमः ॥
घोरवाहनगम्याय अगम्याय नमो नमः । घोरब्रह्मस्वरूपाय भैरवाय नमो नमः ॥
घोरशब्दाय घोराय घोरदेहाय ते नमः । घोरद्रव्याय घोराय भैरवाय नमो नमः ॥
घोरसङ्घाय सिंहाय सिद्धिसिंहाय नमो नमः । नमः प्रचण्डसिंहाय सिंहरूपाय ते नमः ॥
नमः सिंहप्रकाशाय सुप्रकाशाय ते नमः । नमो विजयरूपाय जगदाद्य नमो नमः ॥
नमो भार्गवरूपाय गर्भरूपाय ते नमः । नमो भैरवरूपाय भैरवाय नमो नमः ॥
नमो मेध्याय शुद्धाय मायाधीशाय ते नमः । नमो मेघप्रकाशाय भैरवाय नमो नमः ॥
दुर्ज्ञेयाय दुरन्ताय दुर्लभाय दुरात्मने । भक्तिलभ्याय भव्याय भाविताय नमो नमः ॥ १२५ ॥

नमो गौरवरूपाय गौरवाय नमो नमः । नमो भैरवरूपाय भैरवाय नमो नमः ॥
नमो विघ्ननिवाराय विघ्ननाशिन्नमोऽस्तुते । विघ्नविद्रावणायैव भैरवाय नमो नमः ॥
नमो किंशुकरूपाय रजोरूपाय ते नमः । नमो नीलस्वरूपाय भैरवाय नमो नमः ॥
नमो गणस्वरूपाय गणनाथाय ते नमः । नमो विश्वविकासाय भैरवाय नमो नमः ॥
नमो योगिप्रकाशाय योगिगम्याय ते नमः । नमो हेरम्बरूपाय भैरवाय नमो नमः ॥
नमस्त्रिधास्वरूपाय रूपदाय नमो नमः । नमः स्वरस्वरूपाय भैरवाय नमो नमः ॥
नमः सरस्वतीरूप बुद्धिरूपाय ते नमः । नमो वन्द्यस्वरूपाय भैरवाय नमो नमः ॥
नमस्त्रिविक्रमरूपाय त्रिस्वरूपाय ते नमः । नमः शशाङ्करूढाय भैरवाय नमो नमः ॥
नमो व्यापकरूपाय व्याप्यरूपाय ते नमः । नमो भैरवरूपाय भैरवाय नमो नमः ॥
नमो विशदरूपाय भैरवाय नमो नमः । नमः सत्यस्वरूपाय भैरवाय नमो नमः ॥
नमः सूक्तस्वरूपाय शिवदाय नमो नमः । नमो गङ्गास्वरूपाय यमुनारूपिणे नमः ॥
नमो गौरीस्वरूपाय भैरवाय नमो नमः । नमो दुःखविनाशाय दुःखमोक्षस्वरूपिणे ॥
महाचलाय वन्द्याय भैरवाय नमो नमः । नमो नन्दस्वरूपाय भैरवाय नमो नमः ॥
नमो नन्दिस्वरूपाय स्थिररूपाय ते नमः । नमो केलिस्वरूपाय भैरवाय नमो नमः ॥
नमः क्षेत्रनिवासाय वासिने ब्रह्मवादिने । नमः शान्ताय शुद्धाय भैरवाय नमो नमः ॥
नमो नर्मदरूपाय जलरूपाय ते नमः । नमो विश्वविनोदाय जयदाय नमो नमः ॥
नमो महेन्द्ररूपाय महनीयाय ते नमः । नमः संसृतिरूपाय शरण्याय च ते नमः ॥
नमस्त्रिबन्धुवासाय बालकाय नमो नमः । नमः संसारसाराय सरसां पतये नमः ॥
नमस्तेजःस्वरूपाय भैरवाय नमो नमः । नमः काव्यस्वरूपाय भैरवाय नमो नमः ॥
नमो गोकर्णरूपाय ब्रह्मवर्णाय ते नम । नमः शङ्करवर्णाय हस्तिकर्णाय ते नमः ॥
नमः विष्टरकर्णाय यज्ञकर्णाय ते नमः । नमः शम्बुककर्णाय भैरवाय नमो नमः ॥
नमो दिव्यसुकर्णाय कालकर्णाय ते नमः । नमो भयदकर्णाय भैरवाय नमो नमः ॥
नमः आकाशवर्णाय कालकर्णाय ते नमः । नमो दिग्रूपकर्णाय भैरवाय नमो नमः ॥ १४८ ॥

नमो विशुद्धकर्णाय विमलाय नमो नमः । नमः सहस्रकर्णाय भैरवाय नमो नमः ॥
नमः नेत्रप्रकाशाय सुनेत्राय नमो नमः । नमो वरदनेत्राय जयनेत्राय ते नमः ॥
नमो विमलनेत्राय योगिनेत्राय ते नमः । नमः सहस्रनेत्राय भैरवाय नमो नमः ॥
नमः कलिन्दरूपाय कलिन्दाय नमो नमः । नमो ज्योतिःस्वरूपाय ज्योतिषाय नमो नमः ॥
नमस्तारप्रकाशायताररूपिन्नमोऽस्तु ते । नमो नक्षत्रनेत्राय भैरवाय नमो नमः ॥
नमश्चन्द्रप्रकाशाय चन्द्ररूप नमोऽस्तु ते । नमो रश्मिस्वरूपाय भैरवाय नमो नमः ॥
नमः आनन्दरूपाय जयानन्दस्वरूपिणे । नमः द्रविडरूपाय भैरवाय नमो नमः ॥
नमः शङ्खनिवासाय शङ्कराय नमो नमः । नमो मुद्राप्रकाशाय भैरवाय नमो नमः ॥
नमो न्यासस्वरूपाय न्यासरूप नमोऽस्तुते । नमो बिन्दुस्वरूपाय भैरवाय नमो नमः ॥
नमो विसर्गरूपाय प्रणवरूपाय ते नमः । नमो मन्त्रप्रकाशाय भैरवाय नमो नमः ॥
नमो जम्बुकरूपाय जङ्गमाय नमो नमः । नमो गरुडरूपाय भैरवाय नमो नमः ॥
नमो लम्बुकरूपाय लम्बिकाय नमो नमः । नमो लक्ष्मीस्वरूपाय भैरवाय नमो नमः ॥
नमो वीरस्वरूपाय वीरणाय नमो नमः । नमः प्रचण्डरूपाय भैरवाय नमो नमः ॥
नमो दम्भस्वरूपाय डमरूधारिन्नमोऽस्तु ते । नमः कलङ्कनाशाय कालनाथाय ते नमः ॥
नमः सिद्धिप्रकाशाय सिद्धिदाय नमो नमः । नमः सिद्धस्वरूपाय भैरवाय नमो नमः ॥
नमो धर्मप्रकाशाय धर्मनाथाय ते नमः । धर्माय धर्मराजाय भैरवाय नमो नमः ॥
नमो धर्माधिपतये धर्मध्येयाय ते नमः । नमो धर्मार्थसिद्धाय भैरवाय नमो नमः ॥
नमो निर्जररूपाय रूपारूपप्रकाशिने । नमो राजप्रकाशाय भैरवाय नमो नमः ॥
नमः प्रतापसिंहाय प्रतापाय नमो नमः । नमः कोटिप्रतापाय भैरवाय नमो नमः ॥
नमः सहस्ररूपाय कोटिरूपाय ते नमः । नमः आनन्दरूपाय भैरवाय नमो नमः ॥
नमः संहारबन्धाय बन्धकाय नमो नमः । नमः विमोक्षरूपाय मोक्षदाय नमो नमः ॥
नमो विष्णुस्वरूपाय व्यापकाय नमो नमः । नमो माङ्गल्यनाथाय शिवनाथाय ते नमः ॥
नमो व्यालाय व्याघ्राय व्याघ्रस्तपिन्नमोऽस्तु ते । नमो व्यालविभूषाय भैरवाय नमो नमः ॥ १७१ ॥

नमो विद्याप्रकाशाय विद्यानां पतये नमः । नमो योगिस्वरूपाय क्रूररूपाय ते नमः ॥
नमो संहाररूपाय शत्रुनाशाय ते नमः । नमो पालकरूपाय भैरवाय नमो नमः ॥
नमः कारुण्यदेवाय देवदेवाय ते नमः । नमो विश्वविलासाय भैरवाय नमो नमः ॥
नमो नमः प्रकाशाय काशीवासिन्नमोऽस्तु ते । नमो भैरवक्षेत्राय क्षेत्रपालाय ते नमः ॥
नमो भद्रस्वरूपाय भद्रकाय नमो नमः । नमो भद्राधिपतये भयहन्त्रे नमोऽस्तु ते ॥
नमो मायाविनोदाय मायिने मदरूपिणे । नमो मत्ताय शान्ताय भैरवाय नमो नमः ॥
नमो मलयवासा कैलासाय नमो नमः । नमो कैलासवासाय कालिकातनयाय ते नमः ॥
नमो संसारपाराय भैरवाय नमो नमः । नमो मातृविनोदाय विमलाय नमो नमः ॥
नमो यमप्रकाशाय नियमाय नमो नमः । नमः प्राणप्रकाशाय ध्यानाधिपतये नमः ॥
नमो समाधिरूपाय निर्गुणाय नमो नमः । नमः मन्त्रप्रकाशाय मन्त्ररूपाय नमः ॥
नमो वृन्दविनोदाय वृन्दकाय नमो नमः । नमः बृंहितरूपाय भैरवाय नमो नमः ॥
नमो मान्यस्वरूपाय मानदाय नमो नमः । नमो विश्वप्रकाशाय भैरवाय नमो नमः ॥
नमो नैमिषपीठाय सिद्धपीठाय ते नमः । नमो मण्डलपीठाय भक्तपीठाय ते नमः ॥
नमो यशोदानाथाय कामनाथाय ते नमः । नमो विनोदनाथाय सिद्धनाथाय ते नमः ॥
नमो नाथाय नाथाय ज्ञाननाथाय ते नमः । नमः शङ्करनाथाय जयनाथाय ते नमः ॥
नमो मुद्गलनाथाय नीलनाथाय ते नमः । नमो बालकनाथाय धर्मनाथाय ते नमः ॥
विश्वनाथाय नाथाय कार्यनाथाय ते नमः । नमो भैरवनाथाय महानाथाय ते नमः ॥
नमो ब्रह्मसनाथाय योगनाथाय ते नमः । नमो विश्वविहाराय विश्वमाराय ते नमः ॥
नमो रङ्गसनाथाय रङ्गनाथाय ते नमः । नमो मोक्षसनाथाय भैरवाय नमो नमः ॥
नमो गोरक्षनाथाय गोरक्षाय नमो नमः । नमो मन्दारनाथाय नन्दनाथाय ते नमः ॥
नमो मङ्गलनाथाय चम्पानाथाय ते नमः । नमः सन्तोषनाथाय भैरवाय नमो नमः ॥
नमो निर्धननाथाय सुखनाथाय ते नमः । नमः कारुण्यनाथाय भैरवाय नमो नमः ॥
नमो द्रविडनाथाय दरीनाथाय ते नमः । नमः संसारनाथाय जगन्नाथाय ते नमः ॥ १९४ ॥

नमो माध्वीकनाथाय मन्त्रनाथाय ते नमः । नमो न्याससनाथाय ध्याननाथाय ते नमः ॥
नमो गोकर्णनाथाय महानाथाय ते नमः । नमः शुभ्रसनाथाय भैरवाय नमो नमः ॥
नमो विमलनाथाय मण्डलेशाय ते नमः । नमः सरोजनाथाय सत्यनाथाय ते नमः ॥
नमो भक्तसनाथाय भक्तिनाथाय ते नमः । नमो मोहननाथाय वत्सनाथाय ते नमः ॥
नमो मातृसनाथाय विश्वनाथाय ते नमः । नमो बिन्दुसनाथाय जयनाथाय ते नमः ॥
नमो मङ्गलनाथाय धर्मनाथाय ते नमः । नमो गङ्गासनाथाय भूमिनाथाय ते नमः ॥
नमो धीरसनाथाय बिन्दुनाथाय ते नमः । नमः कञ्चुकिनाथाय शृङ्गिनाथाय ते नमः ॥
नमः समुद्रनाथाय गिरिनाथाय ते नमः । नमो माङ्गल्यनाथाय कद्रुनाथाय ते नमः ॥
नमो वेदान्तनाथाय श्रीनाथाय ते नमः । नमो ब्रह्माण्डनाथाय भैरवाय नमो नमः ॥
नमो गिरीशनाथाय वामनाथाय ते नमः । नमः बीजसनाथाय भैरवाय नमो नमः ॥
नमो मन्दिरनाथाय मनोनाथाय ते नमः । नमो भैरवीनाथाय भैरवाय नमो नमः ॥
अम्बानाथाय नाथाय जन्तुनाथाय ते नमः । नमः कालिसनाथाय भैरवाय नमो नमः ॥
नमो मुकुन्दनाथाय कुन्दनाथाय ते नमः । नमः कुण्डलनाथाय भैरवाय नमो नमः ॥
नमोऽष्टचक्रनाथाय चक्रनाथाय ते नमः । नमो विभूतिनाथाय शूलनाथाय ते नमः ॥ २०७ ॥
नमो न्यायसनाथाय न्यायनाथाय ते नमः । नमो दयासनाथाय जङ्गमेशाय ते नमः ॥
नमो विशदनाथाय जगन्नाथाय ते नमः । नमः कामिकनाथाय भैरवाय नमो नमः ॥
नमः क्षेत्रसनाथाय जीवनाथाय ते नमः । नमः शैलनाथाय चैलनाथाय ते नमः ॥
नमो मात्रासनाथाय अमात्राय नमो नमः । नमो द्वन्द्वसनाथाय भैरवाय नमो नमः ॥
नमः शूरसनाथाय शूरनाथाय ते नमः । नमः सौजन्यनाथाय सौजन्याय नमो नमः ॥
नमो दुष्टसनाथाय भैरवाय नमो नमः । नमो भयसनाथाय बिम्बनाथाय ते नमः ॥
नमो भैरवनाथाय भैरवाय नमो नमः । नमो विटङ्कनाथाय टङ्कनाथाय ते नमः ॥
नमश्चर्मसनाथाय खड्गनाथाय ते नमः । नमः शक्तिसनाथाय धनुर्नाथाय ते नमः ॥
नमो बाणसनाथाय शापनथाय ते नमः । नमो यन्त्रसनाथाय भैरवाय नमो नमः ॥

नमो गण्डूषनाथाय गण्डूषाय नमो । नमो डाकिनीनाथाय भैरवाय नमो नमः ॥
नमो डामरनाथाय डारकाय नमो नमः । नमो डङ्कसनाथाय डङ्कनाथाय ते नमः ॥
नमो माण्डव्यनाथाय यज्ञनाथाय ते नमः । नमो यजुःसनाथाय क्रीडानाथाय ते नमः ॥
नमः सामसनाथायाथर्वनाथाय ते नमः। नमः शून्याय नाथाय स्वर्गनाथाय ते नमः ह्रीं ॐ ॥ २२१ ॥

**फलश्रुतिः**

इदं नामसहस्रं मे रुद्रेण परिकीर्तितम् । यः पठेत्पाठयेद्वापि स एव मम सेवकः ॥
यं यं चिन्तयते कामं कारकारं प्रियाकृतिम् । यः शृणोति दुरापं स तं तं प्राप्नोति मामकः ॥
राजद्वारे श्मशाने तु पृथिव्यां जलसन्निधौ । यः पठेन्मानवो नित्यं स शूरः स्यान्न संशयः ॥
एककालं द्विकालं वा त्रिकालं वा पठेन्नरः । स भवेद्बुद्धिमाँल्लोके सत्यमेव न संशयः ॥
यः शृणोति नरो भक्त्या स एव गुणसागरः । यः श्रद्धया रात्रिकाले शृणोति पठतेऽपि वा ॥
स एव साधकः प्रोक्तः सर्वदुष्टविनाशकः । अर्धरात्रे पठेद्यस्तु स एव पुरुषोत्तमः ॥
त्रिसन्ध्ये वै देवगृहे श्मशाने च विशेषतः । वने च मार्गगमने बले दुर्जनसन्निधौः ॥
यः पठेत्प्रयतो नित्यं स सुखी स्यान्न संशयः । विद्यार्थी लभते विद्यां धनार्थी लभते धनम् ॥
शौर्यार्थी लभते शौर्यं पुत्रार्थी पुत्रमाप्नुयात् । एकविंशतिमन्त्रेण अक्षरेण सहैव मे ॥
यः पठेत्प्रातरुत्थाय सर्व काममवाप्नुयात् । रसार्थी आठमात्रेण रसं प्राप्नोति नित्यशः ॥
अन्नार्थी लभते चान्नं सुखार्थी सुखमाप्नुयात् । रोगी प्रमुच्यते रोगाद्बद्धो मुच्येत बन्धनात् ॥
शापार्थी लभते शापं सर्वशत्रुविनाशनम् । स्थावरं जङ्गमं वापि विषं सर्वं प्रणश्यति ॥
सर्वलोकप्रियः शान्तो मातापितृप्रियङ्करः । सङ्ग्रामे विजयस्तस्य यः पठेद्भक्तिसंयुतः ॥
सर्वत्र जयदं देवि स्तोत्रमेतत्प्रकीर्तितम् । इदं स्तोत्रं महापुण्यं निन्दकाय न दर्शयेत् ॥
असाधकाय दुष्टाय मातापितृविकारिणे । अधार्मिकाकुलीनाभ्यां नैतत्सोत्रं प्रकाशयेत् ॥
साधकाय च भक्ताय योगिने धार्मिकाय च । गुरुभक्ताय शान्ताय दर्शयेत्साधकोत्तमः ॥
अन्यथा पापलिप्तः स्यात्क्रोधाय भैरवोत्तमे । तस्मात्सर्वप्रयत्नेन गोपनीयं प्रयत्नतः ॥

इदं स्तोत्रं च रुद्रेण रामस्यापि मुखेऽर्पितम् । तन्मुखान्निःसृतं लोके दरिद्रायापि साधवे ॥
रामेण कथितं भ्रात्रे लक्ष्मणाय महात्मने । ततो दुर्वाससा प्राप्तं तनैवोक्तं तु पाण्डवे ॥
पाण्डवोऽप्यब्रवीत्कृष्णं कृष्णेनेह प्रकीर्तितम् । अस्य स्तोत्रस्य माहात्म्यं रामो जानाति तत्त्वतः ॥
रामोऽपि राज्यं सम्प्राप्तो ह्यस्य स्तोत्रस्य पाठतः । पाण्डवोऽपि तथा राज्यं सम्प्राप्तो भैरवस्य च ॥
अनेन स्तोत्रपाठेन किमलभ्यं भवेदिति । सर्वलोकस्य पूज्यस्तु जायते नात्र संशयः ॥

**॥ इति श्रीरुद्रयामले श्रीबटुकभैरवसहस्रनामस्तोत्रं सम्पूर्णम् ॥**


प्रकाशन तिथि: २-२७-२०२६